|| चमकप्रश्नः ||

|| camakapraśnaḥ ||

1º Anuvaka

ॐ अग्नाविष्णू सजोषसेमावर्धन्तुवां गिरः ।

om agnāviṣṇū sajoṣasemāvardhantuvāṁ giraḥ |

द्युम्नैर्वाजेभिरागतम्। वाजश्च मे प्रसवश्च मे

dyumnairvājebhirāgatam | vājaśca me prasavaśca me

प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे

prayatiśca me prasitiśca me dhītiśca me kratuśca me

स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे

svaraśca me ślokaśca me śrāvaśca me śrutiśca me

ज्योतिश्च मे सुवश्च मे प्राणश्च मे व्यानश्च मेऽसुश्च मे

jyotiśca me suvaśca me prāṇaśca me vyānaśca me'suśca me

चित्तं च म आधीतं च मे वाक्च मे मनश्च मे

cittaṁ ca ma ādhītaṁ ca me vākca me manaśca me

चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे

cakṣuśca me śrotraṁ ca me dakṣaśca me

बलं च म ओजश्च मे सहश्च म आयुश्च मे

balaṁ ca ma ojaśca me sahaśca ma āyuśca me

जरा च म आत्मा च मे तनूश्च मे शर्म च मे

jarā ca ma ātmā ca me tanūśca me śarma ca me

वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूꣳषि च मे शरीराणि च मे ॥१॥

varma ca me'ṅgāni ca me'sthāni ca me parūgṁṣi ca me śarīrāṇi ca me ||1||

2º Anuvaka

ज्यैष्ठ्यं च म् आधिपत्यं च मे

jyaiṣṭhyaṁ ca ma̱ ādhipatyaṁ ca me

म॒न्युश्च॑ मे॒ भाम॑श्च॒ मेऽम॑श्च मेऽम्भ॑श्च मे

ma̱nyuśca me̱ bhāmaśca̱ me'maśca me'ambhaśca me

जे॒मा च॑ मे महि॒मा च॑ मे वरि॒मा च॑ मे प्रथि॒मा च॑ मे

je̱mā ca me mahi̱mā ca me vari̱mā ca me prathi̱mā ca me

व॒र्ष्मा च॑ मे द्राघु॒या च॑ मे वृ॒द्धं च॑ मे॒ वृद्धि॑श्च मे

va̱rṣmā ca me drāghu̱yā ca me vṛ̱ddhaṁ ca me̱ vṛddhiśca me

स॒त्यं च॑ मे श्र॒द्धा च॑ मे॒ जग॑च्च मे॒ धनं॑ च मे॒

sa̱tyaṁ ca me śra̱ddhā ca me̱ jagacca me̱ dhanaṁ ca me̱

वश॑श्च मे॒ त्विषि॑श्च मे क्री॒डा च॑ मे॒ मोद॑श्च मे

vaśaśca me̱ tviṣiśca me krī̱ḍā ca me̱ modaśca me

जा॒तं च॑ मे जनि॒ष्यमा॑णं च मे सू॒क्तं च॑ मे सु॒कृ॒तं च॑ मे

jā̱taṁ ca me jani̱ṣyamāṇaṁ ca me sū̱ktaṁ ca me sukṛ̱taṁ ca me

वि॒त्तं च॑ मे॒ वेद्यं॑ च मे भू॒तं च॑ मे भवि॒ष्यच्च॑ मे

vi̱ttaṁ ca me̱ vedyaṁ ca me bhū̱taṁ ca me bhavi̱ṣyacca me

सु॒गं च॑ मे सु॒पथं॑ च म ऋ॒द्धं च॑ म॒ ऋद्धि॑श्च मे

su̱gaṁ ca me su̱pathaṁ ca ma ṛ̱ddhaṁ ca ma̱ ṛddhiśca me

क्लृ॒प्तं च॑ मे॒ क्लृप्ति॑श्च मे म॒तिश्च॑ मे सुम॒तिश्च॑ मे॥२॥

kḷ̱ptaṁ ca me̱ kḷptiśca me ma̱tiśca me suma̱tiśca me ||2||

## 3º Anuvaka

शं च॑ मे॒ मय॑श्च मे प्रि॒यं च॑ मेऽनुका॒मश्च॑ मे॒ काम॑श्च मे

śaṁ ca me̱ mayaśca me pri̱yaṁ ca me'nukā̱maśca me̱ kāmaśca me

सौमन॒सश्च॑ मे भ॒द्रं च॑ मे॒ श्रेय॑श्च मे॒

saumana̱saśca̍ me bha̱dram̐ ca̍ me̱ śreya̍śca me̱

वस्य॑श्च मे॒ यश॑श्च मे॒ भग॑श्च मे॒ द्रवि॑णं च मे

vasya̍śca me̱ yaśa̍śca me̱ bhaga̍śca me̱ dravi̍ṇam̐ ca me

य॒न्ता च॑ मे ध॒र्ता च॑ मे॒ क्षेम॑श्च मे॒ धृति॑श्च मे॒

ya̱ntā ca̍ me dha̱rtā ca̍ me̱ kṣema̍śca me̱ dhṛti̍śca me̱

विश्व॒ं च मे॒ मह॑श्च मे सं॒विच्च॑ मे॒ ज्ञात्र॒ं च मे॒

viśva̍m̐ ca me̱ maha̍śca me sa̱m̐vicca̍ me̱ jñātra̍m̐ ca me̱

सूश्च॑ मे प्र॒सूश्च॑ मे॒ सीर॒ं च मे ल॒यश्च॑ म

sūśca̍ me pra̱sūśca̍ me̱ sīra̍m̐ ca me la̱yaśca̍ ma

ऋ॒तं च॑ मे॒ऽमृत॒ं च मेऽय॒क्ष्मं च॒ मेऽना॑मयच्च मे

ṛ̱tam̐ ca̍ me̱'mṛta̍m̐ ca me'ya̱kṣmam̐ ca̱ me'nā̍mayacca me

जी॒वातु॑श्च मे दीर्घायु॒त्वं च॑ मेऽनमि॒त्रं च॒ मेऽभ॑यं च मे

jī̱vātu̍śca me dīrghāyu̱tvam̐ ca̍ me'nami̱tram̐ ca̱ me'bha̍yam̐ ca me

सु॒गं च॑ मे॒ शय॑नं च मे सू॒षा च॑ मे सुदिन॒ं च मे॥३॥

su̱gam̐ ca̍ me̱ śaya̍nam̐ ca me sū̱ṣā ca̍ me sudina̍m̐ ca me ||3||

## 4º Anuvaka

ऊर्क्च॑ मे सू॒नृता॑ च मे॒ पय॑श्च मे॒ रस॑श्च मे

ūrkca̍ me sū̱nṛtā̍ ca me̱ paya̍śca me̱ rasa̍śca me

घृ॒तं च॑ मे॒ मधु॑ च मे॒ सग्धि॑श्च मे सपी॑तिश्च मे

ghṛ̱tam̐ ca̍ me̱ madhu̍ ca me̱ sagdhi̍śca me sapī̍tiśca me

कृ॒षिश्च॑ मे॒ वृष्टि॑श्च मे॒ जैत्र॒ं च म॒ औद्भि॑द्यं च मे

kṛ̱ṣiśca̍ me̱ vṛṣṭi̍śca me̱ jaitra̍m̐ ca ma̱ audbhi̍dyam̐ ca me

र॒यिश्च॑ मे॒ राय॑श्च मे पु॒ष्टं च॑ मे॒ पुष्टि॑श्च मे

ra̱yiśca̍ me̱ rāya̍śca me pu̱ṣṭam̐ ca̍ me̱ puṣṭi̍śca me

वि॒भु च॑ मे प्र॒भु च॑ मे ब॒हु च॑ मे॒ भूय॑श्च मे

vi̱bhu ca̍ me pra̱bhu ca̍ me ba̱hu ca̍ me̱ bhūya̍śca me

पू॒र्णं च॑ मे पू॒र्णत॑रं च॒ मेऽक्षि॑तिश्च मे॒ कूय॑वाश्च॒ मेऽन्नं॑ च॒ मेऽक्षु॑च्च मे

pū̱rṇaṁ ca̍ me pū̱rṇata̍raṁ ca̱ me'kṣi̍tiśca me̱ kūya̍vāśca̱ me'nna̍ṁ ca̱ me'kṣu̍cca me

व्री॒हय॑श्च मे॒ यवा॓श्च मे॒ माषा॓श्च मे॒ तिला॓श्च मे

vrī̱haya̍śca me̱ yavā̎śca me̱ māṣā̎śca me̱ tilā̎śca me

मु॒द्गाश्च॑ मे ख॒ल्वा॓श्च मे गो॒धूमा॓श्च मे म॒सुरा॓श्च मे

mu̱dgāśca̍ me kha̱lvā̎śca me go̱dhūmā̎śca me ma̱surā̎śca me

प्रि॒यङ्ग॑वश्च॒ मेऽण॑वश्च मे श्या॒माका॓श्च मे नी॒वरा॓श्च मे॥४॥

pri̱yaṅga̍vaśca̱ me'ṇa̍vaśca me śyā̱mākā̎śca me nī̱varā̎śca me ||4||

## 5º Anuvaka

अश्मा॑ च मे॒ मृत्ति॑का च मे गि॒रय॑श्च मे॒ पर्व॑ताश्च मे॒ सिक॑ताश्च मे॒

aśmā̍ ca me̱ mṛtti̍kā ca me gi̱raya̍śca me̱ parva̍tāśca me̱ sika̍tāśca me̱

व॒न॒स्पत॑यश्च मे॒ हिर॑ण्यं च॒ मेऽय॑श्च मे॒

vana̱spata̍yaśca me̱ hira̍ṇyaṁ ca̱ me'ya̍śca me̱

सीसं॑ च मे॒ त्रपु॑श्च मे श्या॒मं च॑ मे

sīsa̍ṁ ca me̱ trapu̍śca me śyā̱maṁ ca̍ me

लो॒हं च॑ मे॒ऽग्निश्च॑ म॒ आप॑श्च मे

lo̱haṁ ca̍ me̱'gniśca̍ ma̱ āpa̍śca me

वी॒रुध॑श्च म॒ ओष॑धयश्च मे कृ॒ष्टप॒च्यं च॑ मेऽकृ॒ष्टप॒च्यं च॑ मे

vī̱rudha̍śca ma̱ oṣa̍dhayaśca me kṛṣṭapa̱cyaṁ ca̍ me'kṛṣṭapa̱cyaṁ ca̍ me

ग्रा॒म्याश्च॑ मे प॒शव॑ आर॒ण्याश्च॑ य॒ज्ञेन॑ कल्पन्तां

grā̱myāśca̍ me pa̱śava̍ āra̱ṇyāśca̍ ya̱jñena̍ kalpantāṁ

वि॒त्तं च॑ मे॒ वित्ति॑श्च मे भू॒तं च॑ मे॒ भूति॑श्च मे॒

vi̱ttaṁ ca̍ me̱ vitti̍śca me bhū̱taṁ ca̍ me̱ bhūti̍śca me̱

वसु॑ च मे वस॒तिश्च॑ मे॒ कर्म॑ च मे॒ शक्ति॑श्च॒ मेऽर्थ॑श्च म॒

vasu̍ ca me vasa̱tiśca̍ me̱ karma̍ ca me̱ śakti̍śca̱ me'rtha̍śca ma̱

एम॑श्च म इति॑श्च मे गति॑श्च मे॥५॥

ema̍śca ma iti̍śca me gati̍śca me ||5||

## 6º Anuvaka

अ॒ग्निश्च॑ म॒ इन्द्र॑श्च मे॒ सोम॑श्च म॒ इन्द्र॑श्च मे

a̱gniśca̍ ma̱ indra̍śca me̱ soma̍śca ma̱ indra̍śca me

स॒वि॒ता च॑ म॒ इन्द्र॑श्च मे॒ सर॑स्वती च म॒ इन्द्र॑श्च मे

savi̱tā ca̍ ma̱ indra̍śca me̱ sara̍svatī ca ma̱ indra̍śca me

पू॒षा च॑ म॒ इन्द्र॑श्च मे॒ बृह॒स्पति॑श्च म॒ इन्द्र॑श्च मे

pū̱ṣā ca̍ ma̱ indra̍śca me̱ bṛha̱spati̍śca ma̱ indra̍śca me

मि॒त्रश्च॑ म॒ इन्द्र॑श्च मे॒ वरु॑णश्च म॒ इन्द्र॑श्च मे॒

mi̱traśca̍ ma̱ indra̍śca me̱ varu̍ṇaśca ma̱ indra̍śca me̱

त्वष्टा॑ च म॒ इन्द्र॑श्च मे धा॒ता च॑ म॒ इन्द्र॑श्च मे॒

tvaṣṭā̍ ca ma̱ indra̍śca me dhā̱tā ca̍ ma̱ indra̍śca me̱

विष्णु॑श्च म॒ इन्द्र॑श्च मे॒ऽश्विनौ॑ च म॒ इन्द्र॑श्च मे

viṣṇu̍śca ma̱ indra̍śca me̱'śvinau̍ ca ma̱ indra̍śca me

म॒रुत॑श्च म॒ इन्द्र॑श्च मे॒ विश्वे॑ च मे दे॒वा इन्द्र॑श्च मे

ma̱ruta̍śca ma̱ indra̍śca me̱ viśve̍ ca me de̱vā indra̍śca me

पृथि॒वी च॑ म॒ इन्द्र॑श्च मे॒ऽन्तरि॑क्षं च म॒ इन्द्र॑श्च मे॒

pṛthi̱vī ca̍ ma̱ indra̍śca me̱'ntari̍kṣaṁ ca ma̱ indra̍śca me̱

द्यौश्च॑ म॒ इन्द्र॑श्च मे॒ दिश॑श्च म॒ इन्द्र॑श्च मे

dyauśca̍ ma̱ indra̍śca me̱ diśa̍śca ma̱ indra̍śca me

मू̱र्धा च̍ म̱ इन्द्र̍श्च मे प्र̱जाप̍तिश्च म̱ इन्द्र̍श्च मे॥६॥

mū̱rdhā ca̍ ma̱ indra̍śca me pra̱jāpa̍tiśca ma̱ indra̍śca me ||6||

## 7º Anuvaka

अ̱ग̱ंशु̱श्च̍ मे र̱श्मिश्च̱ मेऽदा᳚भ्यश्च̱ मेऽधि̍पतिश्च म

a̱gṁśuśca̍ me ra̱śmiśca̱ me'dā᳚bhyaśca̱ me'dhi̍patiśca ma

उपा̱ग्ंशु̱श्च̍ मेऽन्तर्या̱मश्च̍ म ऐन्द्रवायवश्च̍ मे

upā̱gṁśuśca̍ me'ntaryā̱maśca̍ ma aindravāyavaśca̍ me

मैत्रावरु̱णश्च̍ म आश्वि̱नश्च̍ मे प्रतिप्र̱स्थान̍श्च मे

maitrāvaru̱ṇaśca̍ ma āśvi̱naśca̍ me pratipra̱sthāna̍śca me

शु̱क्रश्च̍ मे म̱न्थी च̍ म आग्रय̱णश्च̍ मे वैश्वदे̱वश्च̍ मे

śu̱kraśca̍ me ma̱nthī ca̍ ma āgraya̱ṇaśca̍ me vaiśvade̱vaśca̍ me

ध्रु̱वश्च̍ मे वैश्वान̱रश्च̍ म ऋतुग्र̱हाश्च̍ मेऽतिग्रा̱ह्या᳚श्च म

dhru̱vaśca̍ me vaiśvāna̱raśca̍ ma ṛtugra̱hāśca̍ me'tigrā̱hyā᳚śca ma

ऐन्द्रा̱ग्नश्च̍ मे वैश्वदे̱वश्च̍ मे

aindrā̱gnaśca̍ me vaiśvade̱vaśca̍ me

मरुत्व̱तीया᳚श्च मे माहे̱न्द्रश्च̍ म आदि̱त्यश्च̍ मे सावि̱त्रश्च̍ मे

marutva̱tīyā᳚śca me māhe̱ndraśca̍ ma ādi̱tyaśca̍ me sāvi̱traśca̍ me

सारस्व̱तश्च̍ मे पौ̱ष्णश्च̍ मे पात्नीव̱तश्च̍ मे हारियोज̱नश्च̍ मे॥७॥

sārasva̱taśca̍ me pau̱ṣṇaśca̍ me pātnīva̱taśca̍ me hāriyoja̱naśca̍ me ||7||

## 8º Anuvaka

इ̱ध्मश्च̍ मे ब̱र्हिश्च̍ मे̱ वेदि̍श्च मे̱ धिष्णि̍याश्च मे̱

i̱dhmaśca̍ me ba̱rhiśca̍ me̱ vedi̍śca me̱ dhiṣṇi̍yāśca me̱

स्रु॒च॑श्च मे चम॒साश्च॑ मे॒ ग्रावा॑णश्च मे॒ स्वर॑वश्च म

sruca̍śca me cama̱sāśca̍ me̱ grāvā̍ṇaśca me̱ svara̍vaśca ma

उपर॒वाश्च॑ मेऽधि॒षव॑णे च मे द्रोणकल॒शश्च॑ मे

upara̱vāśca̍ me'dhi̱ṣava̍ṇe ca me droṇakala̱śaśca̍ me

वाय॒व्या॑नि च मे पूत॒भृच्च॑ म आधव॒नीय॑श्च म॒

vāya̱vyā̍ni ca me pūta̱bhṛcca̍ ma ādhava̱nīya̍śca ma̱

आग्नी॑ध्रं च मे हवि॒र्धानं॑ च मे गृ॒हाश्च॑ मे॒ सद॑श्च मे

āgnī̎dhraṁ ca me havi̱rdhāna̍ṁ ca me gṛ̱hāśca̍ me̱ sada̍śca me

पु॒रो॒डाशा॑श्च मे पच॒ताश्च॑ मेऽवभृ॒थश्च॑ मे स्वगाका॒रश्च॑ मे॥८॥

puro̱ḍāśā̎śca me paca̱tāśca̍ me'vabhṛ̱thaśca̍ me svagākā̱raśca̍ me ||8||

## 9º Anuvaka

अ॒ग्निश्च॑ मे घ॒र्मश्च॑ मे॒ऽर्कश्च॑ मे॒ सूर्य॑श्च मे

a̱gniśca̍ me gha̱rmaśca̍ me̱'rkaśca̍ me̱ sūrya̍śca me

प्रा॒णश्च॑ मेऽश्वमे॒धश्च॑ मे पृथि॒वी च॒ मेऽदि॑तिश्च मे॒

prā̱ṇaśca̍ me'śvame̱dhaśca̍ me pṛthi̱vī ca̱ me'di̍tiśca me̱

दिति॑श्च मे॒ द्यौश्च॑ मे॒ शक्व॑रीर॒ङ्गुल॑यो॒ दिश॑श्च मे य॒ज्ञेन॑ कल्पन्ता॒मृक्च॑ मे॒

diti̍śca me̱ dyauśca̍ me̱ śakva̍rīra̱ṅgula̍yo̱ diśa̍śca me ya̱jñena̍ kalpantā̱mṛkca̍ me̱

साम॑ च मे॒ स्तोम॑श्च मे यजु॑श्च मे

sāma̍ ca me̱ stoma̍śca me yaju̍śca me

दी॒क्षा च॑ मे॒ तप॑श्च म ऋ॒तुश्च॑ मे

dī̱kṣā ca̍ me̱ tapa̍śca ma ṛ̱tuśca̍ me

व्र॒तं च॑ मेऽहोरा॒त्रयोर्वृ॒ष्ट्या बृ॑हद्रथन्त॒रे च॑ मे य॒ज्ञेन॑ कल्पेताम्॥९॥

vra̱taṁ ca̍ me'horā̱trayo̎rvṟṣṭyā bṛ̍hadrathanta̱re ca̍ me ya̱jñena̍ kalpetām ||9||

## 10º Anuvaka

॥
गर्भा॑श्च मे व॒त्साश्च॑ मे॒ त्र्यवि॑श्च मे त्र्य॒वीच॑ मे

garbhā̎śca me va̱tsāśca̍ me̱ tryavi̍śca me trya̱vīca̍ me

दित्य॒वाट् च॑ मे दित्यौ॒ही च॑ मे॒ पञ्चा॑विश्च मे पञ्चा॒वी च॑ मे

ditya̱vāṭ ca̍ me ditya̱uhī ca̍ me̱ pañca̎viśca me pañcā̱vī ca̍ me

त्रिव॒त्सश्च॑ मे त्रिव॒त्सा च॑ मे तु॒र्य॒वाट् च॑ मे तु॒र्यौ॒ही च॑ मे

triva̱tsaśca̍ me triva̱tsā ca̍ me turya̱vāṭ ca̍ me turya̱uhī ca̍ me

पष्ठ॒वाट् च॑ मे पष्ठौ॒ही च॑ म उ॒क्षा च॑ मे व॒शा च॑ म

paṣṭha̱vāṭ ca̍ me paṣṭha̱uhī ca̍ ma u̱kṣā ca̍ me va̱śā ca̍ ma

ऋ॒ष॒भश्च॑ मे वे॒हच्च॑ मेऽनड्वाञ्च॑ मे धे॒नुश्च॑ म॒

ṛṣa̱bhaśca̍ me ve̱hacca̍ me'naḍvāñca̍ me dhe̱nuśca̍ ma̱

आयु॑र्य॒ज्ञेन॑ कल्पतां प्रा॒णो य॒ज्ञेन॑ कल्पतांपा॒नो य॒ज्ञेन॑ कल्पतां व्या॒नो य॒ज्ञेन॑ कल्पता॒ं चक्षु॑र्य॒ज्ञेन॑ कल्पता॒गं॒ श्रोत्रं॑ य॒ज्ञेन॑ कल्पता॒ं मनो॑ य॒ज्ञेन॑ कल्पता॒ं वाग्य॒ज्ञेन॑ कल्पतामा॒तमा य॒ज्ञेन॑ कल्पतां य॒ज्ञो य॒ज्ञेन॑ कल्पताम्॥१०॥

āyu̍rya̱jñena̍ kalpatāṁ prā̱ṇo ya̱jñena̍ kalpatāṁpā̱no ya̱jñena̍ kalpatāṁ vyā̱no ya̱jñena̍ kalpatā̱ṁ cakṣu̍rya̱jñena̍ kalpatā̱gṁ̱ śrotra̍ṁ ya̱jñena̍ kalpatā̱ṁ mano̍ ya̱jñena̍ kalpatā̱ṁ vāgya̱jñena̍ kalpatāmā̱tamā ya̱jñena̍ kalpatāṁ ya̱jño ya̱jñena̍ kalpatām ||10||

## 11º Anuvaka

एका॑ च मे ति॒स्रश्च॑ मे॒ पञ्च॑ च मे स॒प्त च॑ मे॒ नव॑ च म॒ एका॑दश च मे॒ त्रयो॑दश च मे॒ पञ्च॑दश च मे स॒प्तद॑श च मे॒ नव॑दश च म॒ एक॑विग्ं॒शतिश्च मे॒ त्रयो॑विग्ं॒शतिश्च मे॒ पञ्च॑विग्ं॒शतिश्च मे स॒प्तवि॒ग्ं॒शतिश्च मे॒ नव॑विग्ं॒शतिश्च म॒ एक॑त्रिग्ं॒शच्च मे॒ त्रय॑स्त्रिग्ं॒शच्च मे॒ चत॑स्रश्च मे॒ष्टौ च॑ मे॒

ekā̎ ca me ti̱sraśca̍ me̱ pañca̍ ca me sa̱pta ca̍ me̱ nava̍ ca ma̱ ekā̍daśa ca me̱ trayo̍daśa ca me̱ pañca̍daśa ca me sa̱ptada̍śa ca me̱ nava̍daśa ca ma̱ eka̍vigṁśatiśca me̱ trayo̍vigṁśatiśca me̱ pañca̍vigṁśatiśca me sa̱ptavi̍gṁśatiśca me̱ nava̍vigṁśatiśca ma̱ eka̍trigṁśacca me̱ traya̍strigṁśacca me̱ cata̍sraśca me̱ṣṭau ca̍ me̱

द्वाद॑श च मे॒ षोड॑श च मे विग्ं॒श॒तिश्च॑ मे॒ चतु॑र्विग्ंशतिश्च मे॒ऽष्टाविग्ं॑शतिश्च मे॒ द्वात्रिग्ं॑शच्च मे॒ षट्त्रिग्ं॑शच्च मे चत्वारि॒ग्ंशच्च मे॒ चतु॑श्चत्वारिग्ंशच्च मे॒ऽष्टाच॑त्वारिग्ंशच्च मे॒

dvāda̍śa ca me̱ ṣoḍa̍śa ca me vigṁśa̱tiśca̍ me̱ catu̍rvigṁśatiśca me̱'ṣṭāvi̍gṁśatiśca me̱ dvātri̍gṁśacca me̱ ṣaṭtri̍gṁśacca me catvāri̱gṁśacca me̱ catu̍ścatvārigṁśacca me̱'ṣṭāca̍tvārigṁśacca me̱

वाज॑श्च प्रस॒वश्चा॑पि॒जश्च॒ क्रतु॑श्च॒ सुव॑श्च मू॒र्धा च॒

vāja̍śca prasa̱vaśca̎pi̱jaśca̱ kratu̍śca̱ suva̍śca mū̱rdhā ca̱

व्यश्नि॑यश्चाऽन्त्याय॒नश्चान्त्य॑श्च भौव॒नश्च॒ भुव॑न॒श्चाधि॑पतिश्च॥११॥

vyaśni̍yaścā'ntyāya̱naścāntya̍śca bhauva̱naśca̱ bhuva̍na̱ścādhi̍patiśca ||11||

ॐ इड॑ देव॒हूर्मनु॑र्यज्ञ॒नीःबृह॒स्पति॑रुक्थाम॒दानि॑ शग्ं॒सिष॒द्विश्वे॑ दे॒वाः सू᳚क्त॒वाच॒: पृथि॑विमातर्मा मा॑ हिग्ं॒सी॒र्मधु॑ मनिष्ये॒ मधु॑ जनिष्ये॒ मधु॑ वक्ष्यामि॒ मधु॑ वदिष्यामि॒ मधु॑मतीं दे॒वेभ्यो॒ वाच॑मुद्यासग्ं-शुश्रू॒षेण्यां᳚ मनु॒ष्ये᳚भ्य॒स्तं मा॑ दे॒वा अ॑वन्तु शोभयै॑ पि॒तरोऽनु॑मदन्तु॥

om iḍa̍ deva̱hūrmanu̍ryajña̱nīḥbṛha̱spati̍rukthāma̱dāni̍ śagṁsiṣa̱dviśve̍ de̱vāḥ sū̎kta̱vāca̱ḥ pṛthi̍vimātarmā mā̎ higṁsī̱rmadhu̍ maniṣye̱ madhu̍ janiṣye̱ madhu̍ vakṣyāmi̱ madhu̍ vadiṣyāmi̱ madhu̍matīṁ de̱vebhyo̱ vāca̍mudyāsagṁ-śuśrū̱ṣeṇyā̎ṁ manu̱ṣye̎bhya̱staṁ mā̎ de̱vā a̍vantu śobhayai̍ pi̱taro'nu̍madantu ||

ॐ शान्ति॒: शान्ति॒: शान्ति॑:॥

om śānti̱ḥ śānti̱ḥ śānti̍ḥ ||